SHODH PATRA
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
ISSN : 3048-7196, Impact Factor 6.3
Vol. 2, No. 1, Year 2025
Available online : https://shodhpatra.in/

# श्रीजीवन्यायतीर्थविरचितस्य दरिद्रदुर्दैवप्रहसनस्य नान्दीविवेचनम् एकं विश्लेषणात्मकमध्ययनम्

अमृता सिं ओराओ, विद्यावारिधिः अनुसन्धात्री, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः, पत्रवाहनसङ्ख्या : 781337

वैद्युतकसन्देश : amritasoraon@gmail.com

डॉ. नुरिमा इयाच्मिन्, सह-प्राध्यापिका, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः, पत्रवाहनसङ्ख्या : 781337

वैद्युतकसन्देश : nurimayeasmin@gmail.com

**सारांशः**

कार्यारम्भे मङ्गलाचरणं भारतीयसंस्कृतेः विशेषमेकम् अङ्गस्वरूपम्। दूरदेशं गमनात्पूर्वं भगवत्स्मरणं, गुरुजनानां पादस्पर्शः प्रभृतिः ग्रन्थरचनारम्भे ईश्वरं स्तुतिः निवेदनम्, अपितु सामान्यतया पत्ररचनात्पूर्वमेव संक्षेपेन मङ्गलवाचकः 'श्रीः' इत्यादि : शब्दस्योल्लेखः वर्तमानेपि प्रचलितमस्ति। नाट्यवस्तुः अभिनयात्पूर्वं कुशीलवाः अर्थात् नटनट्याः रङ्गविघ्नं निराकरणार्थं यत् स्तुतिपाठादि क्रियते तदेव पूर्वरङ्गः इत्युच्यते। अस्य पूर्वरङ्गस्य वहवः अङ्गाः सन्ति,धनञ्जयः मतानुसारेण पूर्वरङ्गः द्वाविंशतिः संख्यकाः सन्ति। तन्मध्ये प्रमुखोऽस्ति 'नान्दी', रङ्गविघ्नशान्ताय नान्दीकरणम् अवश्यमेव कर्तव्यम् 'नान्दि' धातोः उत्तरम् 'अच्' प्रत्सयेन 'नन्द' भवति, तदनन्तरं 'नन्द' शब्दस्योत्तरं 'प्रज्ञादिभ्यश्च' सूत्रानुसारेण स्वार्थे 'अण्' प्रत्ययेनापिश्च स्त्रीलिङ्गे 'ईप्' इति प्रत्ययेन 'नान्दी' शब्दः निष्पद्यते। अस्मिन् शब्दस्य अर्थोऽस्ति 'आह्लाददायिनी'। पुनः केचनः वदन्ति 'नन्द + घञ्'- नन्दनं, तेन पठ्यते या इति नान्दी। नान्दीति शब्दः सार्थकनामा भवति। इष्ट विषये यत्कामना तदेव आशीः इति उच्यते। येन आशीर्वादवाक्येन स्वकीयस्योपरस्य च कामना पूर्तिः भवति, येन वाक्येन नटाः, देवताः,ब्राह्मणाः,राज्ञाम् च स्तुयते, अपितु आचार्यः, गुरुणामपि स्तुतिः कर्तुं शक्यते, एनं स्तुतिवाक्यं देवतानां कृते आनन्दविधाने उपयोगीश्चेत् नान्दी नाम्ना ज्ञायते। अतः अयं शोधप्रबन्धे कविश्रीजीवन्यायतीर्थविरचितं दरिद्रदुर्दैवप्रहसने नान्दीविवेचनं मया उपस्थापितम्।

**कुटशब्दाः** - मङ्गलाचरणम्, दरिद्रदुर्दैवम्, प्रहसनम्, नान्दी,साहित्यदर्पणम्।


© Shodh Patra

## प्रस्तावना

नाट्यवस्तु: अभिनयात्पूर्वं कुशीलवाः अर्थात् नटनट्या: रङ्गविघ्नं निराकरणार्थं यत् स्तुतिपाठादि क्रियते तदेव पूर्वरङ्ग: इत्युच्यते। अस्य पूर्वरङ्गस्य वहव: अङ्गाः सन्ति,धनञ्जय: मतानुसारेण पूर्वरङ्गः द्वाविंशतिः संख्यकाः सन्ति। तन्मध्ये प्रमुखोऽस्ति 'नान्दी', रङ्गविघ्नशान्ताय नान्दीकरणम् अवश्यमेव कर्तव्यम्।'नान्दि' धातोः उत्तरं 'अच्' प्रत्सयेन 'नन्द' भवति, तदनन्तरं 'नन्द' शब्दस्योत्तरं 'प्रज्ञादिभ्यश्च' सूत्रानुसारेण स्वार्थे 'अण्' प्रत्ययेनापिश्च स्त्रीलिङ्गे 'ईप्' इति प्रत्ययेन 'नान्दी' शब्द: निष्पद्यते। अस्मिन् शब्दस्य अर्थोऽस्ति 'आह्लाददायिनी'। पुन: केचन: वदन्ति 'नन्द + घञ्'- नन्दनं, तेन पठ्यते या इति नान्दी। नान्दीति शब्द: सार्थकनामा भवति। इष्ट विषये यत्कामना तदेव आशीः इति उच्यते। अवश्यकर्तव्य अंशानां मध्ये प्रत्याहारः, नान्दी, रङ्गद्वार: प्रभृतयः पूर्वरङ्गस्य अङ्गेषु 'नान्दीकरणम् अवश्यमेव कर्तव्यमिति ज्ञायते। अपि च अन्यान्य: अङ्गानां वर्णनं यदि कवि: कर्तुमिच्छति चेत् कर्तुं शक्यते, यदि कर्तुं न इच्छति तर्हि न करिष्यतीति इयं विश्वनाथस्योभिमतम् –

**यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।**

**कुशीलवा: प्रकुर्वन्ति पूर्वरङ्ग: स उच्यते ॥**

**प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।**

**तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥**[१]

'नान्दी' नामकरणस्य सार्थकता विचारणार्थं उक्तं यत् आशीर्वादः देवाद्विजादिनां स्तुतिः नृपप्रशंसा: इत्यादि सर्वेषां कृते आनन्दविधानं क्रियते अत अस्य नाम 'नान्दी ' इत्युभिधीयते।

**आशीर्वचनसुयुक्ता सुतिर्यस्मात् प्रयुज्यते।**

**देवद्विजनृपादीनां तस्मात्नाम्दीति संज्ञिता ॥**[२]

रूपकेषु प्रस्तावनात्पूर्वं मङ्गलाचरणस्वरूप: नान्दीश्लोकः पाठयरूपेण आसीदिति वैष्णवालंकारिक: रूपगोस्वमीनः मन्यते - 'प्रस्तावना वस्तुमुखे नान्दी कार्या शुभावहा।' नान्दी वाक्येषु कविना मङ्गलवाचकः शङ्ख -चन्द्रः- अज्व अर्थात् पद्म: कोक अर्थात् चक्रवाकोऽपि च कैरव अर्थात् कुमुद् प्रभृति शब्दानां प्रयोगः क्रियते।

**माङ्गल्य-शङ्ख-चन्द्राब्ज-कोक कैरवशंसिनी।**

**पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुता।।**[३]

'शंसति:' शदस्य अर्थः पठनं, कवि: एतेषु शब्देषु कोऽपि शब्दस्य प्रयोगः नान्दी श्लोके कर्तुं शक्यते। अत्र टीकाकारेण केवलं अभिधावृत्तिः माध्यमेन एव शब्दानां प्रयोगः कर्तव्यमिति न मन्यते।नान्दीश्लोका: द्वादशपदयुक्तमष्टपदयुक्तञ्च भवन्ति –

**पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत।**[४]

अत्र 'पद' इति शब्द: विषये पण्डितेषु विभिन्नानि मतभेदानि सन्ति। व्याकरणशास्त्रस्य साधारणनियमानुसारेण 'सुप् तिङन्तम् पदम्', अर्थात् रामादि शब्दविभक्तियुक्तपदाः सुवन्तपदिति नाम्ना ज्ञायते अपि तु गच्छत्यादि धातुविभक्तियुक्तपदाः तिङ्न्तपदिति नाम्ना ज्ञायते। 'पद' इति शब्दस्य व्याकरणशास्त्रसम्मतोऽर्थ: यदि क्रियते चेत् अधिकांश: नान्दी श्लोकानां नान्दी लक्षणं युक्तिपूर्वकं न भवेत्। कारणं तत्र द्वयो: त्रिषुश्च श्लोकेषु द्वादशाधिकानि पदानि सन्ति। अतः कोऽपि श्लोकस्य एकचतुर्थांश: अर्थात् श्लोकस्य पाद: पद: इत्युच्यते। यदि तदेव भवति तर्हि नान्द्या: न्यूनतमं श्लोकद्वयं अवश्यमेव भवेत्। केवलं यदि श्लोकद्वयं भवति तर्हि अष्टपदा भवेत्। यदा पादिति शब्द: पदिति मन्यते तदा श्लोकद्वयमष्टपदा नान्दी भवेत्। तथापि कालिदासविरचितेन अभिज्ञानशकुन्तलम् नाटके केवलं एकेन श्लोकेन नान्द्या: वर्णनमस्ति। अतः तत्र चतुष्पदा नान्दी भवति। परन्तु आचार्येण विश्वनाथमतानुसारेण नान्दी न्युनातिन्यूनमष्टपदजातं भवितुमर्हति। अभिज्ञानशकुन्तलम् संस्कृतसाहित्यस्य श्रेष्ठ: नाटकः- 'काव्येषु नाटकं रम्यम् तत्र रम्या शकुन्तला'। तत्र यदि नान्द्या: लक्षणं न प्रयुज्यते अर्थात् लक्षणस्य अव्याप्तिर्भवति चेत् लक्षणस्य यथार्थता नास्ति इति मन्यते। एतदकारणादेव अन्यः पण्डितसमूह अत्र पदशब्दस्यार्थं अवान्तरवाक्यः इति कृतवन्त:। यदि पदशब्दस्य एतदर्थं स्वीक्रियते तर्हि शकुन्तलायाः अष्टपदनान्दी लक्षणसङ्गत: भवति। पदशब्दस्य पूर्वोक्तं त्रिविधमर्थमेव भवितुमर्हति, अस्मिन् विषये नाट्यप्रदीपे स्पष्टतया वर्णनमस्ति –

**श्लोक पादः पदं केचित् सुप्तिङ्न्तमथापरे।**

**परेऽवान्तरवाक्यैक स्व-रुपं पदमुचिरे।।**[५]

आचार्यभरतकृतस्य नाट्यशास्त्रस्य टीकायामभिनवगुप्तोऽपि पद: शब्दस्य पूर्वोक्तं त्रिविधमर्थं कृतवान् - पदानि श्लोकावयवभूतानि तिङ्न्तानि सुवन्तानि वा श्लोकतुरीयांशपदानि वा, अवान्तररूपाणि वा ॥

साहित्यदर्पणकारविश्वनाथेन नान्द्या: यं पदं उल्लिखितं तत् सुवन्तं तिङ्न्तं च शब्दा: इति मन्यते। तेन द्वादशपदा नान्द्या: यदुदाहरणं दत्तं एतस्मादेव मतमेतद् स्पष्टं जातम्। पदशब्दस्य भिन्नं अर्थं यदि वयं स्वीक्रियते तर्हि नान्द्या: उदाहरणम् अन्येभ्यः रूपकेभ्य अस्माभिः अवगन्तव्यम्। "निष्प्रत्युहम् "इत्यादि 'अनर्घराघव' नाटके प्रयुक्त: नान्दीश्लोकः अष्टपदानान्द्या: उदाहरणस्वरूप:। विश्वनाथस्य पित्रा विरचितेन 'पुष्पमाला' नामके नाटके द्वादशपदानान्द्या: वर्णनमस्ति। अस्मिन् उदाहरणे 'सुखेन्दुरुचि' शब्दे इन्द्रः शब्दस्य

उल्लेख: प्राप्यते। इन्द्रः शब्दस्य अर्थोऽस्ति चन्द्रः। एषः चन्द्रः शब्द: नान्द्यां मङ्गलवाचकरूपेण परिगण्यते। अतः द्वादशपदानान्द्या: उदाहरणमत्र यथार्थरूपेण विविच्यते।

नान्दी मङ्गलाचरणयोः मध्ये भेदः दृश्यते। रूपके कुशीलवाः नान्दीपाठं कृतवन्त:। मङ्गलाचरणस्य पूर्वैव नान्दीपाठ: भवन्ति। निर्विघ्नेन अभिनीतविषयपरिसमाप्तार्थं कुशीलवाः नान्दीपाठं कुर्वन्ति। तथा च कवि: रङ्गद्वारे नाटकपरिसमाप्तार्थं मङ्गलाचरणं कृतवान्। अतः नान्द्यादनन्तरं मङ्गलाचरणं भवति। मङ्गलाचरणं यथा रङ्गद्वारांशे भवति तथैव रङ्गद्वारादेव नाटकम् आरभ्यते। एतद् कारणादेव मङ्गलाचरणं नाटकस्य अंशः भवति। परन्तु नान्दी रङ्गद्वारस्य विषयः भवति, नाटके एतस्योल्लेखः न दृश्यते अतः एतद् नाटकस्य अंशरूपेण न परिगण्यते। प्राचीन पुथिषु 'नान्द्यन्ते सुत्रधारः' एतद् पाठं प्राप्यते। अनन्तरं रङ्गद्वारे 'वेदान्तेषु' इत्यादि श्लोकस्योल्लेखोस्ति। नट: नान्दीश्लोक: पठति तदनन्तरं सूत्रधारः कविना विरचितं प्रथमश्लोकं रङ्गद्वारस्य अङ्गरूपेण पठति। अतः नान्द्या: अनन्तरं सुत्रधारः 'वेदान्तेषु' इत्यादि उच्चारितवान्। मङ्गलाचरणस्य प्रयोगः नान्द्या: पूर्वं अथवा नान्दी रूपेण कर्तुं न शक्यते। मङ्गलाचरणादेव कवे: रचनात् आरभ्यते इति अवगन्तव्यम्। एतद् कारणादेव भासस्य नाटके 'नान्द्यन्ते ततः प्रविशति सुत्रधारः' इत्यादि निर्देशः प्राप्यते। 'नान्दी' चतुर्विधम्। नाट्यदर्पणे उक्तम्-

**नमस्कृतिर्माङ्गलिकी आशी: पत्रावली तथा।**

**नान्दी चतुर्धा निविष्टा नाटकादिषु धीमता ॥**[६]

यथा- नमस्कृति: माङ्गलिकी आशी: पत्रावली च। यस्मिन् नान्द्यां नाटकीय कथावस्तु: वीजाकारेण श्लेषसमासोक्तिश्चालंकारमाध्यमेन उल्लिख्यते तद् पत्रावली नान्दी कथ्यते।

**यस्यां व्यञ्जस्य विन्यासो ह्यभिधेयस वस्तुनः।**

**श्लेषेण वा समासोक्त्या नान्दी पत्रावली सा ॥**[७]

कविः श्रीजीवविरचितं 'दरिद्रदुदैवम्' इति प्रहसने नान्द्या: वर्णनं प्राप्यते-

**गजवदनषडाननादयो यननिकटम् अटन्ति बुभुक्षया कुटुम्वाः।**

**करपुटकलिताल्पभिक्षयाप्तो दिशतु शिवं स ललाटलो वः॥**[८]

अत्र ललाटलोचनशिवाय प्रणम्यः समासोक्तिर्श्लेषेन च नाटकीय कथावस्तु उल्लिख्यते। श्लोकस्य वाच्यार्थः भवति- गजवदनः अर्थात् गणेशः, षडाननः अर्थात् कार्तिकः कुटुम्ब: अर्थात् परमात्मीयाः वुभुक्षायां पीडित्वा महादेवस्य समीपे क्षुधानिवृत्यर्थं गच्छन्ति। सः महादेवः मुष्ठिमेकं भिक्षादानेन तुभ्यं शिवं दिशतु। अर्थात् यदा देवी पार्वती अन्नपूर्णारूपं धारयति तदा महादेवः भिक्षावृत्तिः ग्रहनेन जगतः

सन्ततिम् अपि च स्वीयसन्ततिनां रक्षार्थं प्रचेष्टां कृतवान्। एषः शिवः सहृदयानामपि मङ्गलविधानं क्रियते एतदेव अस्योभिधाशक्तिगतोऽर्थः।

श्लोकेऽस्मिन् समासोक्तेश्श्लेषालंकारश्च माध्यमेन नाटकीय कथावस्तुः सुन्दरतया वर्णितमस्ति। यथा महादेवपार्वत्या: द्वौ पुत्रौ कार्तिकगणेशश्च येषां अपरानि नामानि गजाननः षडाननश्च, आलोच्य श्लोके गजाननः षडाननश्च शब्दद्वयस्य प्रयोगः दृश्यते। अत्र शब्दश्लेषेण अस्मिन् प्रहसने नायकः वक्रेश्वरस्य पुत्रद्वयं अवगम्यते। अस्मिन् प्रहसने पुत्रद्वयस्य नाम लम्बोदरः षडाननश्चेति प्राप्यते। अत्र 'कुटुम्वा' इति शब्देन निकटात्मीयजना: अभिप्रेताः। किन्तु उक्ते प्रहसने अनेन शब्देन नायकः वक्रेश्वरस्य स्त्री मन्दोदरी अभिप्रेताः आसीत्। ललाटलोचनं शिवं प्रणम्य अत्र नायकः वक्रेश्वरस्य कथा सुचितास्ति। न केवलं महादेवस्य भिक्षाप्रार्थीरूपेण अपि तु तस्य पुत्रद्वयस्य अन्नप्रार्थनामाध्यमेनापि प्रहसनस्य नायकः वक्रेश्वरः भिक्षां याचितवान्। अपि तु तस्य द्वौ पुत्रौ तेन समीपे अन्नं याचितवन्तौ अस्यैव पूर्वाभासोत्र प्रदत्तम्। अत्र शिवस्य एतद् रूपं प्रणामनिवेद्यार्थं एकः भिन्नः गुढ़ः अर्थोऽस्ति। तदेव अन्नपूर्णा रूपं धारणात् पूर्वं पार्वतीः शिवेन अपमानिता अभवत्। तथापि एव आलोच्य प्रहसनेऽपि वक्रेश्वरेण तस्य स्त्रीः लाञ्छितापमानिता चासीत्। अतएव आलोच्य नान्द्यां श्लेष: समासोक्तिश्च अलंकारेण तदन्तर्निहिताः गुढ़ार्थाः प्रकाशिता अभवत्। अपि च अस्य प्रहसनस्य विषयवस्तुनः संकेत: सुस्पष्टतया वर्णितम् अस्ति, अतः नान्दी श्लोकेन कविः श्रीजीवन्यायतीर्थः समग्रप्रहसनस्य विषयवस्तु: वीजाकारेण अत्र उपस्थाप्यते। अस्मिन् नान्द्यां पदद्वयं भवति चेत् अष्टपदा नान्दी अपि च नाटकीयकथावस्तुनः वर्णनास्ति चेत् पत्रावली श्रेण्यां नान्दी एव भवति,अस्मिन् विषये नास्ति संशयः।

**उपसंहारः**

अवस्थाया अनुकरणं नाट्यमित्युच्यते। नाट्यस्य स्वरूपविषये दशरूपकारेणोक्तम्- **“अवस्थानुकीर्तिर्नाट्यम्”**[९] चतुर्विधैरुपायैरनुकरणमिदं भवति- अङ्गविक्षेपैः, वाक्यैः, वेषभूषाभिः रोमाञ्चस्वदोदमादिभिश्च। एतेषां अभिनयप्रकाराणां नामानि आङ्गिकः, वाचिकः, आहार्यः, सात्त्विकश्चेति। अर्थात् दृश्यमयत्वाद् नाट्यं ‘रूपम्’ इति कथ्यते। अत्र रूपस्यारोपो भवति, अतो ‘रूपकम्’ इत्युच्यते। यथा- नटे रामरूपस्यारोपः। ‘रूपकम्’ इत्यस्यार्थोऽस्ति- कस्मिन् चित् वस्तुनि अन्यवस्तुनोऽवस्थाया आरोपः। यथा- रूपकालङ्कारे उपमेयपदार्थे मुखादिषु सादृश्येनोपमानस्य चन्द्रादेरारोपो भवति तथैव नाट्येऽपि नटे रामादीनां नाट्यपात्राणामवस्था आरोपो भवति। एतस्मात् कारणाद् दृश्यकाव्यं ‘रूपकम्’इत्यप्यभिधीयते।कियत्क्रमैः रूपकस्येतिवृत्तं सफलतां प्राप्नोति। नाट्यघटनाया आरम्भात् समाप्तिपर्यन्तं ये ये विभागा दृश्यन्ते, ते सन्ति- मङ्गलाचरणपाठो नान्दी वा, अर्थप्रकृतिः, कार्यावस्था, अर्थोपक्षेपकः, सन्धिश्चेत्यादयः। कस्यचित् रूपकस्य आदौ मङ्गलाचरणं नान्दीपाठो वा अवश्यकर्तव्यः। भारतीयसंस्कृतौ प्राचीनकालादेव सर्वेषां कार्याणामदौ मङ्गलाचरणं क्रियते स्म। एषः प्राचीनः

संस्कारविशेषः। रूपके मुख्यफलसिद्धेरुपायोऽर्थप्रकृतिरित्युच्यते। बीजं, बिन्दुः, पताका, प्रकरी, कार्यञ्चेति विभागेन एषा पञ्चधा भवति। फलप्राप्त्यर्थं रूपके नायकनिष्ठा या क्रियाविशेषावस्था, सा कार्यावस्था इत्यभिधीयते। कार्यावस्था अपि पुनः पञ्चधा आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्चेति। रूपके मुख्यफललाभाय या क्रिया तस्याः अवस्थाविशेषः सन्धिरिति कथ्यते। एते सन्धयः पञ्च- मुखः,प्रतिमुखः,गर्भः,विमर्शः,उपसंहृतिश्च। कार्यावस्थाया अर्थप्रकृतेश्चाधारेण एव एते पञ्चसन्धयो जायन्ते। अन्यस्मिन्पक्षे ये घटनाविशेषा रूपके दर्शयितुमयोग्याः, किन्तु नटस्याभिलषिताः, तथा ये च घटनाः संवत्सरमेकं वा तस्मात् किंचित् न्यूनं कालं व्याप्यो भवन्ति, अर्थात् या घटना अतीव विस्तीर्णाः ता अर्थोपक्षेपकेन नाटके निरूप्यन्ते। एषोऽर्थोपक्षेपकोऽपि पञ्चधा- विकम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः। अतः दरिद्रदुर्दैवम् इति प्रहसनं सम्यकतया साफल्यार्थं येषां विषयाणां सार्वाधिकं प्रयोजनमस्ति तन्मध्ये 'नान्दी' इत्यस्य महत्वम् अपरिसीम वर्तते। मया अस्मिन् लघुशोधप्रबन्धे दरिद्रदुर्दैवम् प्रहसनस्य नान्द्याः विशदरूपेण विश्लेषणं कृतम्।

## उल्लेखपञ्जी

१. साहित्यदर्पणः,षष्ठपरिच्छेद -२२,२३
२. साहित्यदर्पणः,षष्ठपरिच्छेद -२४
३. साहित्यदर्पणः,षष्ठपरिच्छेद-२५
४. साहित्यदर्पणः,षष्ठपरिच्छेद-२५
५. नाट्यप्रदीप -पृष्ठासंख्या-०२
६. नाट्यदर्पण
७. नाट्यप्रदीप
८. दरिद्रदुर्दैवम् – १ श्लोकः
९. दशरूपकम्,प्रथमप्रकाश-कारिका ७

## सन्दर्भग्रन्थसूची

१.दरिद्रदुर्दैवम्-ड. परमेश भट्टाचार्यः,खोकन माइति, संस्कृत वुक डिपो,२८/१,विधानसरणी,कोलकाता-७००००६

२.साहित्यदर्पणः-अध्यापकः उदय बन्द्योपाध्यायः, संस्कृत वुक डिपो,२८/१,विधानसरणी,कोलकाता-७००००६

३.भरत नाट्यशास्त्रः – ड. सुरेशचन्द्र बन्द्योपाध्यायः,नवपत्र प्रकाशन,कलिकाता-७३


© Shodh Patra

४.अभिज्ञानशकुन्तलम्- ड. सत्यनारायण चक्रवर्ती,संस्कृत पुस्तक भाण्डार ३८,विधान सरणि ,कोलकाता – ७००००६

५. त्रिपाठी , डॉ. राधावल्लभ। संस्कृत साहित्य का समग्र इतिहास। दिल्ली न्यु भारतीय बुक कारपोरेशन, २०१८।

६. मोहन , डॉ. ज्योत्स्ना। काव्यप्रकाशः। जवाहर नगर दिल्ली नाग प्रकाशक , १९९९।

७. अग्रवाल , डॉ. संगीता। साहित्यदर्पणः। नई दिल्ली मुरारीलाल एंड सन्स पावलिशार्स , २०२२।

८. मिश्रः , डॉ. श्रीनारायणः। झा , डॉ. शशिनाथ। रसगङ्गाधरः। वाराणसीः चौखम्वा कृष्णदास अकादमी , २०१७।